# APPENDIX - I

१. जम्भलिका गीतिविशेषः यथा । शुद्धा खण्डा च मात्रा च सम्पूर्णेति चतुर्व्विधा ।

भवेद्द्विपदिकागीतिर्भरतेन प्रकीर्तिता ।।

भवेञ्चतुर्भिश्चरणैस्त्रयोदशकलात्मकैः ।

शुद्धा द्विपदिकागीतिः सैवा जम्भलिकोच्यते ।।

२. चतुर्दशकलायुक्तैश्चतुर्भिश्चरणैरिह ।
खण्डाख्या द्विपदीगीतिः खण्डधारापि सा भवेत् ।

३. आक्षिप्तिका पात्रप्रवेशसूचिका गीतिः। गाथा छन्दस्तल्लक्षणं पिङ्गले ।
पढमं बारह मत्ता बीए अट्ठारहेण संजुत्ता ।
जह पढमं तह तीअं दहपञ्च विभुसिआ गाहा ।।

४. दिशोऽवलोक्य पूर्व्वलक्षितया द्विपदाख्यगीत्या वदतीत्यर्थः । एवं सर्व्वत्र व्याख्येयः।

५. चर्च्चरी गीतिविशेषः कदाचित्तु राग-भेदः ।

६. भिन्नको रागविशेषः।

७. खण्डके गीतिविशेषे यथा । पूर्वं चतुर्विंशतिभिरष्टा विंशतिभिः परं ।
मा चाभिरिह यस्यार्धं खण्डकः स प्रकीर्त्तितः ।।

८. चर्च्चरिकयोपविश्येत्यादौ चर्च्चरिका गतिविशेषः ।

९. खुरको नृत्यविशेषः ।

१०. वलन्तिका रागोपाङ्गविशेषः ।

११. वामकं वामाङ्कपार्श्वस्थितवस्त्ववलोकनसंस्थानविशेषः । यदुक्तं -
धूतेन शिरसा यत्तु पार्श्वेन, वलितेन च ।
तद्वामकं वै करणं, पार्श्वस्थस्यावलोकने ।।

१२. ककुभो रागविशेषः षट् उपभङ्गा अवच्छेदाः ।

१३. कुटिलिका नाट्यविशेषः ।

१४. मन्दघटी नाट्यविशेषः ।

१५. नृत्यगीतवाद्यानां साम्यं लयस्तद्द्वयान्तरे ।

१६. नन्दावर्तापनामकः संस्थानविशेषो द्विचतुरस्त्रकः, स च द्विवारं कृतत्वादर्धद्विचतुरस्त्रकः । यदुक्तं
यस्यैव चेच्चरणयोरन्तरं स्यात् यदङ्गलं ।
वितस्तिमात्रमथवा नन्दावर्त तदुच्यते ।।
अस्यैव प्रकृतसंस्थानस्येत्यर्थः । अयमेव चार्द्धद्विचतुरस्त्रकइत्याहु ः ।

१७. नन्दावर्तप्रमाणाद्धि भवेदष्टादशाङ्गुलं ।
अन्तरं चतुरे ः स्थानं चतुरस्त्रं तदोदितम् ।। इति ।

१८. रागभेदः । स्थानकमालापविशेषः ।

१९. खण्डिका गीतिविशेषो गद्यविशेषो वा ।

२०. गलितको नाट्यविशेषः ।